## Abstract No 31

# “भारतीयकाव्यशास्त्रे मूलप्रश्नः“

**Dr. Ghanshyam Bairwa**

Associate Professor, Government P G College, Sri Ganganagar, Rajasthan, India, Bikaner University
drbairwa@gmail.com

The key question of Sanskrit aesthetics has explored the essence of literature not on the ground of form or content but also on the mind and emotions. The ***Rasa Sidhhant*** has mapped very basic of mind and emotion in psychological way. This paper explores the theoretical understanding of ***Dhvani Siddhant*** to understand why some literary pieces remain timeless in terms of joy and relevance. The ***Mahakavya*** were greatly influence by these understanding in very creative and subtle way. They were not only narratives. The paper tries to understand these key questions through ***Dhvani Siddhant***.

शब्दार्थौ ते शरीरम्। आत्मविरहितं शरीरं कथं शोभनं भविष्यति। अतो विचारणीयोऽयं प्रष्नः यत् काव्यस्यात्मा कोऽस्ति। यतोहि यथा षरीरे सर्वाणि अंगानि सत्यपि आत्मा न स्यात् तर्हि तस्योपयोगो न भवति इति विचिन्त्य काव्यमर्मज्ञैः काव्यस्यात्मा कोऽस्ति एतत् चिन्तनं कृतम्। अस्मिन् सन्दर्भे अथर्ववेदे प्रथमं प्रयुक्तस्य ध्वनिषब्दस्य पतञ्जलिभर्तृहरिप्रभृतिभिर्महावैयाकरणैः स्फोटे तदभिव्यञ्जके प्राकृते ध्वनौ, तस्य चिराचिरोपलब्धिनिमित्ते वैकृते च ध्वनौ व्यवहारः कृतः। ततष्चानन्दाभिनवगुप्तादिभिध्र्वनतीति ध्वनिरिति व्यञ्जके शब्दे, ध्वनति ध्वनयतीतिवा ध्वनिरिति व्यञ्जकोऽर्थे, ध्वन्यते अनेनेति व्यञ्जनाव्यापारे, ध्वन्यते य इति ध्वनिरिति रसादिव्यग्यार्थे तथा ध्वन्यतेऽस्मिन्निति ध्वनिकाव्ये ध्वनिषब्दः प्रयुक्तः। तंत्र ध्वनिव्यापारेणाभिव्यक्तो रसादिध्वनिरपोऽर्थ एव विषिष्ट वाच्य-वाचक-रचना प्रपऽच-चारूणः काव्यस्य सारभूतः। ध्वनिकार आनन्दवर्धनाचार्य काव्यस्य सारतत्त्वं निरूपयन् प्राह- **“काव्यस्यात्मा ध्वनिरिति बुधैः यः समाम्नातपूर्वः।“** अयमाषयो यत् यो हि ध्वनिः विद्वद्भिः प्राचीनैः सम्यक् रूपेण वर्णितो वर्तते स एव ध्वनिः काव्यस्यात्मा वर्तते। आनन्दवर्धनात् पूर्वस्मिन् कालेऽलंकारषास्त्रे ध्वनिविषये मुख्यतः तिस्रो विप्रतिपत्तय आस्न्। केचित् तस्य ध्वनेरभावं प्रतियादयामासुः। अपरे तं ध्वनिं भाक्तम् अन्ये च तमनिर्वचनीयमेव कथयामासुः।